"visamāt padatas tyaktvā varga-sthāna-cyutena mūlena,
dvi-guṇena bhajec cheṣam labdham viniveśayet panktyām
1
tad-vargam samśodhya dvi-gunī-kurvīta pūrva-val labdham,
utsārya tato vibhajet śesam dvi-gunam krtam dalayet 2 "

tato labdhānkasya cheda-rāśih, sat laksāni, dvātrimśat-sahasrāni, catvāri śatāni, sapta-catvārimśad-adhikāni. 632447, etāni ca prānta-varti-saptakam muktvā sarvāny ardhī-kriyante tato jātāni trīni laksāni sodaśa sahasrāni dve śate sapta-vimśaty-adhike 316227, śesam uparidam uddharati catvāri laksāni, catur-aśīti-sahasrāni, catvāri śatāni, eka-saptaty argalāni 484471, amūni ca yojanāni, gavyūtam yojanasya caturthāmśah, tataś caturbhir gunitāni jātā ekona-vimśatir laksāh, sapta-trimśat-sahasrā, astau śatāni, catur-aśīti yutāni gavyūtānām 1937884, tataś cheda-rāśinā sad-laksādinā navaram antya-saptakam api dvi-gunam krtvā bhāge hrte labdham gavyūta-tritayam, śesam idam uparistāt tisthati, catvārimśat-sahasrāni, pañca-śatāni, dvāvimśaty-adhikāni 40522, ekena gavyūtena dhanuh-sahasra-dvayam bhavati, tāvatā ca gavyūta-rūpa uddharita[1]-rāśir gunyate, tad yathāgre śūnya-trayam datvā mūla-rāśir dvi-guno vidhīyate, jātā astau kotayo daśa-laksāś catuścatvārimśat sahasrāh 81044000,

---

[1] = *uddhārita*

pūrvokta-ccheda-rāśinā bhāgo hriyate labdham aṣṭāviṃśaty-adhikam dhanuḥ-śatam 128, śeṣam idam upari dhanū-rūpam tiṣṭhati ekona-navatiḥ sahasrāṇy aṣṭāśīty-adhikāny aṣṭau śatāni 89888, tato 'ngulānayanāya ṣaṇ-ṇavatyā ekasya guṇa-kāre datte jātāni ṣaḍaśīti-lakṣāṇy ekonatriṃśatsahasrāṇi dve śate 'ṣṭa-catvāriṃśad-adhike 8629248 prāktana-rītyā cheda-rāśim adho vihāya bhāge hṛte labdhāni trayodaśāṅgulāni 13, uparidam avaśiṣyate, catvāri lakṣāṇi, sapta sahasrāṇi, ṣaṭ-catvāriṃśad-adhikāni trīṇi śatāni 407346, ardhāṅgulā-nayanāya eṣa rāśir dvi-guṇī-kriyate, jātāny aṣṭau lakṣāṇi, catur-daśa sahasrāṇi, ṣaṭ-śatāni, dvi-navaty-argalāni 814692, prāktanena ccheda-rāśinā bhakte labdham ardham aṅgulam, śeṣam uddharati, ekā lakṣa, dvy-aśītiḥ sahasrāṇi, dve śate aṣṭātriṃśad-adhike 182238, eṣa jambūdvīpasya paridhir iti 7

7 '***vikkhaṃbha***' [etc] Here the subject is the wall around Jambūdvīpa Moreover, this [wall] must be conceived as surrounded at the outside by a lattice and it has a balcony[1] on top. At the base [this wall] is twelve *yojanas* [wide] The balcony is [four *yojanas*] wide and its average width must be reckoned as eight *yojanas* inside Jambūdvīpa [2] [Now, in order

---

[1] In the *Jainendra Siddhānta Kośa* (J Varṇī, 1970), Part III, p 601 a *vedikā* is described as a wall that stands on the outskirts of mountains, rivers, islands, etc Their occurrence in the world is widespread (पर्वत नदी द्वीप आदिको घेरे रहनेवाली दीवारको वेदिका कहत हैं। लोकमें इन्का अवस्थान व विस्तार।)

[2] This wall (also called a '*jagatī*', see Kirfel, p 214) looks like a rampart around a city It is eight *yojanas* high and four at the top It is made of diamond The lattice around it (*jāla-kaṭaka*, ibid = *kaṭaka-*

to calculate its circumference] imagine an outer region in the middle of the Lavana Ocean measuring four *yojanas* [1] [First] '*viskambha*', etc '*viskambha* (diameter)' means 'width' [Take] the square of that At this point [make] the multiplication, viz. four multiplied with four is sixteen, etc '*daśa-guna* (ten times)' means 'multiplied with ten'. [Carry out] that operation. [Calculate] the square root with the even-and-uneven [method], etc.[2] When this is done, what do we have? [The author] says '*vaṭṭassa* (of a circle)', etc [3] A wall can enclose a circle or a round space. The circumference being multiplied with a quarter or fourth part of the diameter is the surface area [4] The general meaning of the verse is· this is the formula to calculate the circumference and surface area of all circular fields The particular meaning, however, is this· the diameter of Jambūdvīpa is one lakh of *yojanas* So [the number] one is put down in the front, [then] five zeros· 100,000 The square of that is formed one single number one

---

jālaka) consists of gems It is $^1/_2$ *yojana* high and 500 *dhanus* broad The circular lotus balcony on top of this wall (*padma-vara-vedikā*, ibid) has the same measures On this balcony, there are lovely gardens

[1] Prabhānanda is using an example to explain how the circumference and the surface area of a circle are calculated He holds an imaginary circle of four leagues in diameter before the reader or listener, situated somewhere out in the vast plain of the Lavana Ocean

[2] This will be explained below

[3] If d is the diameter of a circle and $d = 4$ *yojanas*, then the formula to calculate the circumference is $\sqrt{10d^2}$ or in this case 12,64 *yojanas* This calculation is correct if we keep in mind that for the Jainas the value of $\pi = \sqrt{10}$ or 3,16, etc

[4] Or, if C is the circumference of a circle, then the formula to calculate the surface area is $C\,{}^{d}/_{4}$ This is again correct if $\pi = \sqrt{10}$ or 3,16, etc

in front and ten zeros 10,000,000,000 When multiplied again with ten, one zero is added 100,000,000,000 [Calculate] the base or root of that This to be calculated according to [the method of] Āryādvaya[1], viz

> "*After having subtracted of the odd place, divide by twice the root extracted from the place of the square The result obtained should be put down in the line The square of that, double [this] After having subtracted, with the number of the following odd place added [and] after having moved the result as before, then divide Double the result The result should be halved* "[2]

---

[1] Āryādvaya = Āryabhata I (not Āryabhata II) See Datta & Singh (1962[3]), p 170*ff* Compare also with the calculation as described in the commentary of Siddhasena Gani on the *Tattvārthādhigamasūtra* (ref found in Datta & Singh, idem, p 171, thanks to the suggestion of Dr Jean-Michel Delire) The complete calculation is given in 'Appendix 1'

[2] Let us take the number 196 as an example This example and the graphic presentation of it are based on the edition and translation by François Patte of the *Līlāvatī* of Bhāskara with the commentaries of Gangādhara and Sūryadāsa (ref communicated by Dr J-M Delire) First the odd (*visama*, v) and even (*sama*, s) places have to be determined, starting from the first number which, in Indian mathematics, is the one most to the right

←		
1	9	6
viṣama	*sama*	*viṣama*

---

v		*S*		*v*		
	196		96		16	
$1^2 =$	1	2 x [4] =	8	$4^2 =$	16	
	096		16		00	
2				28		$\sqrt{196} = 28 - 2 =$ 14

Now we have the verses of the *JDSH* in which the algorithm is explained

visamāt padatas tyaktvā varga-sthāna-cyutena mūlena,
dvi-gunena bhajec chesam labdham viniveśayet panktyām 1
tad-vargam samśodhya dvi-gunī-kurvīta pūrva-val labdham,
utsārya tato vibhajet śesam dvi-gunam krtam dalayet 2

I have arranged a part of the second verse in a slightly different manner in order to try to make sense of the algorithm *tad-vargam* ***dvi-gunī-kurvīta saṃśodhya*** *pūrva-val labdham* Analysis

(1) *visamāt padatas tyaktvā* After having subtracted [the root] of the [last] odd place [from the last odd place] $\sqrt{1} = 1$, $1 - 1 = 0$,

(2) *varga-sthāna-cyutena mūlena dvi-gunena bhajet* divide [the following even place] by twice the root extracted from the place of the square $9 - (1 \times 2) = 4$

(3) *śesam labdham viniveśayet panktyām* The result obtained [viz of the doubling of the root, 2] should be put down in the line [of the result, here the last row below]

(4) *tad-vargam* [Take] the square of that $2^2 =$ [4]

(5) *dvi-gunī-kurvīta* Double [this] $4 \times 2 = 8$

(6) *samśodhya* After having subtracted $9 - 8 = 1$, with the number 6 of the following odd place added = 16,

Accordingly, the number of the divisor is obtained six lakhs, thirty-two thousand, four hundred and forty-seven or 632,447[1] All these [numbers], setting aside the [number] seven occurring at the end, are divided by two Then three lakhs, sixteen thousand two hundred and twenty-seven occur 316,22-7 This result is placed on top The four lakhs, eighty-four thousand, four hundred and seventy-one or 484,471, is taken up again [in order to continue the approximation procedure][2] These are *yojanas* A *gavyūta* is one fourth of a *yojana* So, multiplied with four, nineteen lakhs plus thirty-seven thousand, eight hundred and eighty-four *gavyūtas* 1,937,884 are obtained Then, with the divisor of six lakhs, etc [viz the 632,447 mentioned higher up] but only with the last seven multiplied by two added [viz 632,454[3]], when the fraction is obtained, three *gavyūtas* result This is placed on top [Next, we have] forty thousand, five hundred and twenty-two

---

(7) *pūrva-val labdham utsārya* [and] after having moved the result [viz 16, to the next column] as [done] before [with the number 96],

(8) *tato vibhajet* then divide [this result by 4 which is the square root of $16 = 4^2$] $16 - 4 = 4$

(9) *śesam dvi-gunam* Double the result (in the sense of '*śesam dvi-gunī-kurvīta*') 4 x 2 = 8 [and put it in the line of the result 28 is obtained]

(10) *krtam dalayet* The result should be halved [in order to obtain the outcome] $28 - 2 = 14$

[1] This number corresponds with step E of the calculation as presented in 'Appendix 1'

[2] See step **F** in 'Appendix 1', p 278

[3] This divisor of 632,454 will be used in the remaining part of the calculation, obviously in order to round off the calculation

40,522 [1] One *gavyūta* is two thousand *dhanus* So far, the extricated root is calculated in the form of *gavyūtas* [Now it will be calculated in *dhanus*], viz first three zeros are put down, then multiplied by two The result is eight crores, ten lakhs and forty-four thousand 81,044,000 [*dhanus*] This is divided by the divisor previously mentioned [viz. 632,454] One hundred and twenty-eight *dhanus* are obtained 128 This result is put on top in the form of *dhanus* [Then we have] eighty-nine thousand, eight hundred and eighty-eight, 89,888 Then in order to calculate in *angulas*, when ninety-six [*angulas*] for one [*dhanus*] are taken, eighty-six lakhs, twenty-nine thousand, two hundred and forty-eight, 8,629,248 [*angulas*] are obtained Following the previous method, the denominator [viz 632,454] is placed below [and] when divided thirteen, 13 *angulas* are obtained This [result] is put as remainder on top Four lakhs, seven thousand, three hundred and forty-six 407,346 [remains] In order to reckon in half *angulas*, this number is doubled The result is eight lakhs, fourteen thousand, and six hundred and ninety-two 814,692 When divided with the previous denominator one-half *angula* is obtained The result is put on top [This yields] one lakh, eighty-two thousand, two hundred and thirty-eight 182,238 [as remainder] This is the [calculation of the] circumference of Jambūdvīpa [with 316,227 *yojanas*, 3 *gavyūtas*, 128 *dhanus*, 13 *angulas* and 1 half *angula* as outcome]

---

[1] See step G in 'Appendix 1', p 278

SŪTRA 8

अमुमेवार्थं स्पष्टतरमाह -

amum evārtham spaṣṭataram āha -

[The author] states the matter more explicitly.

परिही[1] तिलक्ख[2] सोलस[3],सहस्स[4] दो[5] य[6] सय[7] सत्त[8]वीस[9]हिया[10] ।
कोसतिगट्ठा[11]वीसं[12], धणु[13]सय[14] तेरङ्गुल[15]द्ध[16]हियं[17] ॥ ८ ॥

---

[1] परिहि Ed3, Bhog2, 4, 7, 9, 10, 14 & 17 परीहा Bhog6 परही Bhog16

[2] क्ख omitted in Bhog2 तिलक्खा Bhog5 तिलख Bhog6 & 10

[3] सोलस्स Brd2 & 3, Bhog1, 7, 9 & 16 स omitted in Bhog6 सहस्ससोलदो Bhog12 सोलअ Bhog13

[4] सहस Bhog8 & 10 सयस्स Bhog17

[5] दो omitted in Brd3

[6] य omitted in LD1 & 2, Bhog6, 8, 10 & 12 In LD1, this is corrected in the margin इ for य in Bhog1, 7, 11 & 16 ई in Bhog15

[7] सय omitted in LD1 & Bhog17

[8] सत Brd3 & Bhog1 सभ Bhog13 सत्ता Bhog15

[9] विस Brd2 & Bhog13 विसा Bhog4

[10] हीया LD1, Brd2 & 3, Tueb हिआ LD2 हिया ३१८२२७ Bhog2 हियाओ Bhog6 हीआ Bhog15

[11] तिगमट्ठा Ed3 तिगट्ठ Bhog1 तीग३अट्ठा Bhog2 Bhog4 has तिगंट्ठा and adds ३१६२२७ कोओ ४१२८ अं १३१ after तिगं तिगसट्ठ Bhog5 तीयअट्ठ Bhog6 तिगअट्ठा Bhog9, 10 & 13 तिगअट्ठ Bhog12 तिगअवा(?) Bhog15 तिगऽट्ठा Bhog16

[12] विसं Brd2 वीस Bhog1 & 15

[13] धणुं Bhog4, 10, 12 & 13

[14] सयं LD2 & Bhog8 सय १२७ Bhog2

[15] तेरंगुरि(?)हील Bhog8 तेरगुल Bhog10 & 14

[16] द्धती Bhog2 द्धम Bhog6 ह(?) Bhog12 ध Bhog15

[17] हिअं Ed1 हिय LD1, Bhog9 & 13 हियं १३ Bhog2

parihī ti-lakkha solasa,-sahassa do ya saẏa satta-vīsa-hiẏā; kosa-tig'[1]-aṭṭhā-vīsaṃ, dhaṇu-saẏa ter'-aṃgul'-addha-hiẏaṃ. 8.

(परिधिस्त्रिलक्षाः षोडषसहस्रा द्वे च शते सप्तविंशत्यधिके । क्रोशत्रयमष्टाविंशं धनुःशतं त्रयोदशाङ्गुलमर्द्धाधिकम् ॥ ८ ॥ *paridhis tri-lakṣāḥ ṣoḍaśa-sahasrā dve ca śate sapta-viṃśaty-adhike, krośa-trayam aṣṭā-viṃśam dhanuḥ-śatam, trayodaśāṅgulam ardhādhikam 8*)

8 The circumference [of Jambūdvīpa] is three lakhs, sixteen thousand and two hundred and twenty-seven [*yojanas*], three *krośas*, one hundred and twenty-eight *dhanus*, thirteen and a half *angulas*

COMMENTARY

परिही^इति - योजनानां तिस्रो लक्षाः, षोडश सहस्रा, द्वे शते सप्तविंशत्यधिके, क्रोशत्रयमष्टाविंशं, धनुःशतं, त्रयोदशाङ्गुलान्यर्द्धं चाङ्गुलं साधिकं जम्बूद्वीपस्य परिधिः परिक्षेपो भवति। इहाधिकग्रहणादेका यूका लिक्षा चैका लभ्यत इत्यादि विशेषार्थिना स्वयमेवाभ्यूह्यं, सूत्रकारेणोपेक्षितत्वान्मयापि न लिखितमिति ॥ ८ ॥

parihī^iti - yojanānām tisro lakṣāḥ, ṣoḍaśa sahasrā, dve śate sapta-viṃśaty-adhike, krośa-trayam, aṣṭā-viṃśam dhanuḥ-śatam, trayo-daśāṅgulāny ardham cāṅgulam sādhikaṃ jambūdvīpasya paridhiḥ parikṣepo bhavati ihādhika-grahaṇād ekā yūkā likṣā caikā labhyata ity ādi viśeṣārthinā svayam evābhyūhyam, sūtra-kāreṇopekṣitatvān mayāpi na likhitam iti 8

---

[1] *triga < trika*

8 **'parihī'** [etc] The circumference [or] perimeter of Jambūdvīpa is three lakhs, sixteen thousand, two hundred and twenty-seven *yojanas*, three *krośas*, one hundred and twenty-eight *dhanus*, thirteen and a half *angulas* and [somewhat] more [1] The word '*adhika* (more)' here implies one *yūkā* and one *likṣā*[2] Who desires to know the details can make the calculation himself [3] Since it is left out by the author of the manual, I do not mention it also

---

[1] See Kirfel, p 124 ' 316227 Yojana, 3 Gāvyuta, 128 Dhanus und noch etwas mehr als $13^{1}/_{3}$ Angula ' Note that the *JDSH* here ends with $^{1}/_{2}$ in stead of $^{1}/_{3}$ Note also that a *krośa* is the same as a *gavyūta*

[2] Lit 'an egg of a louse' For the Jaina linear measures, see Kirfel, p 337

[3] The diameter of Jambūdvīpa is 100,000 *yojanas* The value of π as calculated by the Jainas is $\sqrt{10}$ or 3,16227, etc

SŪTRAS 9 & 10

अधुना जम्बूद्वीपस्य गणितपदे कृते यत्संपद्यते तदभिधित्सुराह -
adhunā jambūdvīpasya ganita-pade krte yat sampadyate tad abhidhitsur āha -
Now that the surface area of Jambūdvīpa has been treated [the author], wishing to explain what this amounts to, explicates·

सत्तेव[1] य[2] कोडि[3]सया[4], नउआ[5] छप्पन्न[6] सय[7]सहस्साइं[8] ।
चउ[9]णउयं[10] च सहस्सा[11], सयं[12] दिवड्ढं[13] च[14] साहीयं[15] ॥ ९ ॥[16]
गाउयमेगं[1] पन्नरस[2], धणू[3]सया[4] तह[5] धणूणि[6] पन्न[7]रस[8] ।[9]

---

[1] सतेव Brd2, Bhog2 & 12 सत्तिव Bhog9
[2] LD1, Brd2 & 3, Bhog1, 6 & 15 omit य
[3] कोडी LD1, Brd2 & 3, Bhog1
[4] शया Bhog9 & 13 ससय Bhog10
[5] नओया LD1 नउया Brd1, 2 & 3, Tueb, Bhog1, 5, 8 & 7
[6] छपन्न LD1, 2(?), Brd1 छप्पण्ण Bhog2 च्छप्पन्न Bhog10 छप्पण Bhog12 छप्पन्नंच Bhog15 छप्पान Bhog17
[7] सये Bhog16
[8] सहस्साइ Brd2, Bhog5 & 15 सहस्साय Bhog9 & 10 सहस्सायं Bhog12 सहस्साये Bhog14 सहस्साई Bhog17
[9] चओ LD1, Bhog9 & 13
[10] णओयं LD1 णवइं Bhog5 णऊयं Bhog7 & 16 णओयं Bhog9 & 13 णवइ Bhog12 णसयं Bhog17 उ omitted in Bhog8, 10 & 15
[11] हस्सा omitted in Brd2
[12] सय Brd2 & 3
[13] दीवड्ढं Bhog1 द्दिवड्ढं Bhog2 दिवढं Bhog15
[14] च ७९०५३८४१५० Bhog2
[15] साहियं Ed2 & 3, Brd2 & 3, Bhog4, 7, 10, 11, 13, 14, 15 & 16 साहीय LD1 साहीअं LD2 साहिय Bhog2
[16] Bhog6 omits this verse

सट्ठिं[10] च[11] अङ्गुलाइं[12], जंबुद्दीवस्स[13] गणिय[14]पयं[15] ॥ १० ॥[16]

satt'-eva ya koḍi-sayā, naüā chap-panna saya-sahassāiṃ;
caü-ṇaüyaṃ ca sahassā, sayaṃ divaḍḍhaṃ ca sāhīyaṃ. 9.
gāüyam egaṃ pana-rasa, dhaṇū-sayā taha dhaṇūṇi panna-rasa;
saṭṭhiṃ ca aṃgulāiṃ, jaṃbuddīvassa gaṇiya-payaṃ. 10.

(सप्तैव च कोटिशतानि नवतिः षट्पञ्चाशच्छतसहस्राणि। चतुर्नवति च सहस्राणि शतं द्वितीयार्द्धं च साधिकम्॥ ९॥ गव्यूतमेकं पञ्चदश धनुशतानि

---

[1] गाउअमेगं Ed3, LD2, Bhog10, 15 & 16 गाओअमे LD1, गाऊअमे Bhog7 गाऊयमे Bhog17

[2] पाणरस LD1, Brd2 & 3, Bhog7 & 17 [प]न्नरस्स Bhog6 पण्णरस Bhog16

[3] धणु Ed3, LD2, Brd1 & 3, Bhog2(?), 5, 6, 8, 10, 11, 12 & 14 धणूं Brd2 धणु Bhog13

[4] स्सया Bhog5

[5] तहय Bhog8

[6] धणुणि Brd3, Bhog6, 10, 11 & 14 धणूंणि Bhog4 धणुंणि Bhog12

[7] पन्न LD1 पन Brd2 & Bhog4 पण्ण Bhog7 & 16 पणBhog15 & 17

[8] रस १५१५ Bhog2 रसं Bhog5, 7, 8, 11, 12, 16 & 17

[9] गाउयमेगं प is missing in Bhog6

[10] सट्टिं Ed2 सट्ठि LD1, Brd2 & 3, Bhog2 & 14

[11] य Bhog2 च/व(?) Bhog12 चउ Bhog15

[12] अगुलाइ Brd2, Bhog1, Bhog13 अंगुलाई Brd3, Bhog17 अंगुलाइं ३० Bhog2 अंगुलांइं Bhog16

[13] जम्बूद्दीवस्स Ed1, LD2, Brd1, Bhog4, 5, 9, 10, 11 & 12 जम्बूदीवस्स in Ed2, LD1, Bhog1, 2, 6, 8 & 17 is metrically possible जम्बीदीवस Brd2 & 3

[14] गणीय LD1, Brd2, Bhog16 य omitted in Bhog6 & 12

[15] पय Brd2, Bhog9 पय Bhog13

[16] In Bhog8, this is verse 11

तथा धनूंसि पञ्चदश। षष्टिश्चाङ्गुलानि जम्बूद्वीपस्य गणितपदम्॥ १०॥
saptaiva ca koti-śatāni navatih sat-pañcāśac chata-sahasrāni catur-navati ca sahasrāni śatam dvitīyārdham ca sādhikam 9 gavyūtam ekam pañca-daśa dhanu-śatāni tathā dhanūmsi pañca-daśa, sastiś cāngulāni jambūdvīpasya ganita-padam 10.)

9-10. The surface area of Jambūdvīpa is seven hundred and ninety crores, fifty-six hundred thousand and ninety-four thousand, one hundred, and half of the second [*yojanas*] increased with one *gavyūta*, fifteen hundred *dhanus*, fifteen *dhanus* and sixty *angulas*

COMMENTARY

सत्तेव य^इति - गाउय^इति[1] - एवो ऽवधारणे - सप्तकोटिशतानि नवतिकोटयः षट्पञ्चाशल्लक्षाणि चतुर्णवतिसहस्राणि, द्वितीयार्द्धं शत च द्वितीयं शतमर्द्धं यत्र तत् द्वितीयार्द्धं सार्द्धं शतमित्यर्थः। चः समुच्चये। कीदृशमित्याह - साधिकमधिकेन सहिततं, आधिक्यमेवाविष्करोति, गाउय^इति - एकमेकसंख्याकं गव्यूतं क्रोशं, पञ्चदशधनुःशतानि पञ्चदशोत्तराणीत्यर्थः। चः समुच्चयार्थः स च भिन्नक्रमः, तत एवं योज्यते, षष्टिरङ्गुलानि च, जम्बूद्वीपस्य गणितपदं भवतीति शेषः। इदमुक्तं भवति, यदि समचतुरस्राणि समस्तजम्बूद्वीपस्य योजनप्रमाणानि खण्डानि क्रियन्ते तदा यथोक्तसंख्यानि गव्यूताद्यधिकानि भवन्ति। तद्यथा, जम्बूद्वीपस्य परिधिर्योजनानां तिस्रो लक्षाः षोडश सहस्राणि सप्तविंशशतद्वयाधिकानीत्येवंरूपः पञ्चविंशत्या सहस्रैर्गुणनीयः, ततो भवन्ति सप्तकोटीशतानि नवतिः कोटयः षट्पञ्चाशल्लक्षाणि पञ्चसप्ततिः सहस्राणि ७९०५६७५०००, पुनर्गव्यूतत्रितयं पञ्चविंशत्या सहस्रैर्गुणितं जातानि पञ्चसप्ततिः सहस्राणि क्रोशानां ७५०००, एषां चतुर्भिर्भागे हृते लब्धा अष्टादश सहस्राः सप्तशती पञ्चाशदधिका

[1] Ed1 omits गाउयेत्ति

योजनानां १८७५०, एष एकराशिर्मूलराशौ[1] मीलनीयः, ततो ऽष्टाविंशं धनुःशतं पञ्चविंशत्या सहस्रैर् गुणनीयं जातानि द्वात्रिंशद्धनुषां लक्षाणि ३२०००००, अष्टभिर्धनुःसहस्रैर्योजनं भवतीति कृत्वा तदानयनायाष्टभिरेव सहस्रैर्भागो ह्रियते, लब्धाश्चत्वारो योजनशताः ४००, एते ऽपि मूलराशिमध्ये प्रक्षेप्तव्याः, ततः सार्धत्रयोदशाङ्गुलेषु पञ्चविंशत्यैव सहस्रैर्गुणितेषु लब्धानि त्रीणि लक्षाणि सप्तत्रिंशत्सहस्राणि पंचशताधिकानि ३३७५००, एषां धनुरानयनार्थं षण्णवत्या भागो ह्रियते, जातानि त्रीणि धनुःसहस्राणि पंचदशोत्तरपंचशताधिकानि ३५१५, षष्टिरङ्गुलानि चोपरिष्टात्। पुनर्गव्यूतानयनाय धनुःसहस्रद्वयेन भागे हृते लब्धं गव्यूतमेकतं, अधस्तादुद्धरितानि पंचदश शतानि पंचदशोत्तराणि धनुषां १५१५। सर्वांकमीलने जातानि सप्त कोटीशतानि, नवतिकोटयः, षट्पंचाशल्लक्षाणि, चतुर्नवतिः सहस्राणि, सार्धशताधिकानि समचतुरस्राणां योजनप्रमाणखण्डानां, तथैकं गव्यूतं पंचदशोत्तराणि पंचधनुःशतानि षष्टिरङ्गुलानि च, ७९०५६९४१५०, गव्यू १ धनुः १५१५ अङ्गुल ६०, इति सर्वजम्बूद्वीपगणितपदं प्रपंचितं तत्प्रपंचितेन समर्थितं द्वितीयं योजनद्वारम्॥ ९-१०॥

satt'-eva ya^ıtı - gāuya^ıtı *- evo 'vadhārane - sapta-koṭı-śatānı navatı-kotayah sat-pañcāśal-laksānı catur-navatı-sahasrānı, dvıtīyārdham śata ca dvıtīyam śatam ardham yatra tat dvıtīyārdham sārdham śatam ıty arthaḥ cah samuccaye. kīdrśam ıty āha - sādhıkam adhıkena sahıtam, ādhıkyam evāvıskarotı,* ***gāüya^ıtı*** *- ekam eka-samkhyākaṃ gavyūtam krośam, pañca-daśa-dhanuh-śatānı pañca-daśottarānīty arthah caḥ samuccayārthah sa ca bhınna-kramah, tata evam yojyate, sastır angulānı ca, jambūdvīpasya ganıta-padaṃ bhavatīti śesah ıdam uktam bhavatı, yadı sama-caturasrānı samasta-jambūdvīpasya yojana-pramānānı khandānı krıyante*

---

[1] For एषो ऽकराशिर्मूलराशौ

tadā yathokta-samkhyānı gavyūtādy-adhikānı bhavanti. tad yathā, jambūdvīpasya parıdhır yojanānāṃ tısro lakṣāḥ soḍaśa sahasrānı saptāvıṃśa-śata-dvayādhıkānīty evam-rūpaḥ pañca-vımśatyā sahasraır guṇanīyaḥ, tato bhavantı sapta-koṭī-śatānı navatih kotayah sat-pañcāśal-laksānı pañca-saptatıh sahasrāṇı 7905675000, punar gavyūta-trıtayaṃ pañca-vımśatyā sahasraır gunıtaṃ jātānı pañca-saptatıḥ sahasrāṇı krośānām 75000, esām caturbhır bhāge hrte labdhā astādaśa sahasrāh sapta-śatī pañcāśad-adhıkā yojanānāṃ 18750, eṣa eka-rāśır mūla-rāśau mīlanīyah, tato 'ṣṭāvımśaṃ dhanuh-śatam pañca-vıṃśatyā sahasrair guṇanīyam jātānı dvātrımśad-dhanuṣāṃ lakṣānı 3200000, astabhır dhanuh-sahasraır yojanam bhavatīti kṛtvā tad-ānayanāyāṣṭabhır eva sahasraır bhāgo hrıyate, labdhāś catvāro yojana-śatāh 400, ete 'pı mūla-rāśı-madhye prakseptavyāḥ, tataḥ sārdha-trayodaśāngulesu pañca-vıṃśatyaıva sahasraır gunıtesu labdhānı trīnı lakṣānı sapta-trımśat-sahasrānı pañca-śatādhıkānı 337500, esām dhanur-ānayanārtham ṣan-ṇavatyā bhāgo hrıyate, jātānı trīnı dhanuh-sahasrānı pañca-daśottara-pañca-śatādhıkānı 3515, sastır angulāni coparıṣṭāt. punar gavyūtānayanāya dhanuh-sahasra-dvayena bhāge hrte labdham gavyūtam ekam, adhastād uddharıtānı pañca-daśa śatānı pañca-daśottarānı dhanusāṃ 1515 sarvānka-mīlane jātānı sapta koṭī-śatānı, navatı-kotayah, sat-pañcāśal-laksānı, catur-navatıḥ sahasrāṇı, sārdha-śatādhıkānı sama-caturasrānām yojana-pramāna-khandānām, tathaıkam gavyūtaṃ pañca-daśottarānı pañca-dhanuh-śatānı ṣaṣṭır angulānı ca, 7905694150, gavyū 1 dhanuh 1515 angula 60, ıtı sarva-jambūdvīpa-gaṇıta-padam prapañcıtam tat-prapañcıtena samarthıtam dvıtīyaṃ yojana-dvāram. 9-10.

9-10 ***satt'-eva ya'***, ***'gāuya'*** [etc.] The meaning is as follows [The word] '*eva* (only)' is used in restrictive sense Seven hundred crores, ninety crores, fifty-six lakhs, ninety-four thousand, the second half and hundred is the second hundred [and] half, so that [we have] hundred and the half of the second or, one hundred and a half [1] [The word] '*ca*' is used in conjunctive sense [The author] explains in which [sense]· '*sādhikam* (increased)' which means '*adhikena sahitam* (joined with more)' [The author] imparts how much more ***'gāuya'*** one, amounting to one *gavyūta* or *krośa*, fifteen hundred and fifteen *dhanus* So far the meaning [The word] '*ca*' is used in conjunctive sense, but it is not in the correct place[2] So it should be arranged as follows '*sastir angulāni ca*' (and sixty *angulas*)[3] The rest [of the sentence is] the surface area of Jambūdvīpa It is said that if the sectors of the whole of Jambūdvīpa are construed as congruent squares with the size of one *yojana*, then there are the numbers as expressed [above] plus one *gavyūta*, etc Namely, the circumference of

---

[1] So we have in succession

7,000,000,000	
900,000,000	
5,600,000	
94,000	
150	
7,905,694,150	square *yojanas*

[2] Lit 'out of order or out of place, displaced'

[3] Instead of '*sastiś cāngulāni*'

Jambūdvīpa is three lakhs, sixteen thousand and two hundred and twenty-seven [*yojanas*], which has to be multiplied with twenty-five thousand Therefore, there are seven hundred and nine crores, fifty-six lakh and seventy-five thousand 7,905,675,000 [square *yojanas*] Further, three *gavyūtas* multiplied with twenty-five thousand results in seventy-five thousand *krośas* 75,000 When this is divided by four, we obtain eighteen thousand seven hundred and fifty *yojanas* 18,750 This same figure[1] must be included in the basic row of numbers[2] Considering that one *yojana* is equal to eight thousand *dhanus*, in order to calculate this number [in *yojanas*, 3,200,000 *dhanus*] are divided by eight thousand The result is four hundred *yojanas* 400 This [number] also has to be added to the basic row of numbers Next, when thirteen and a half *angulas* are multiplied with twenty-five thousand, the result is three lakhs thirty-seven thousand and five hundred. 337,500 In order to calculate this in *dhanus*, divide this by ninety-six The result is three thousand five hundred and fifteen *dhanus* 3,515, with a remainder of sixty *angulas* Then, in order to calculate in *gavyūtas*, when divided by two thousand *dhanus* the result is round down on one *gavyūta* fifteen hundred plus fifteen *dhanus* 1,515 When all numerical figures are brought together we have seven hundred crores, ninety crores, fifty-six lakhs, ninety-four thousand one hundred and a half square sections of the size of one *yojana* plus one *gavyūta*, fifteen hundred and fifteen *dhanus* and sixty *angulas* 7,905,694,150 - 1 *gavyū* - 1515 *dhanus* - 60 *angulas* In this manner, the

---

[1] *eka-rāśi*

[2] *mūla-rāśi*, viz the original row of numbers constituting the result of the root extraction

surface area of the whole of Jambūdvīpa is treated at length and this treatment the second topic of the *yojanas* has been considered

SŪTRAS 11 & 12

संप्रति क्रमायातं तृतीयं क्षेत्रद्वारं गाथायाः प्रथमपादेनाह -
samprati kramāyātam trtīyam ksetra-dvāram gāthāyāh prathama-pādenāha-
Now, proceeding in regular order, in the first quarter of the [next] verse [the author] treats the third entry, the continents [1]

अथ पुनरक्षरार्थो भणिष्यते, तत्र व्याख्यायमानक्रमागतं चतुर्थं पर्वतद्वारमाह -
atha punar aksarārtho bhanisyate, tatra vyākhyāyamāna-kramāgatam caturtham parvata-dvāram āha -

Again, [the author] will explain the literal meaning [first] Then he treats the fourth topic of the mountains, describing them in due order

भरहाइ[2] सत्त[3]वासा[4], वियड्ढ[5] चउ[1] चउर[2]तीस[3] वट्टियरे[4] ।

---

[1] It is important to note that in Ed1 this introductory sentence and the commentary that follows are brought under the verses 9 and 10 that treat the surface area of Jambūdvīpa This commentary however begins with 'भरहाइ' etc This and the contents of the commentary clearly show that it belongs to verse 11 However, for the sake of clarity I have kept the two versions of the commentaries on verse 11 as distinct entities

[2] भरहाइं LD1, Bhog4, 5 & 13 भरहाईं Brd3, Bhog6, 7, 12 & 17

[3] सत Brd2 सत्र/सत्त(?) Bhog6 & 9 साया Bhog8

[4] खित्ताणां विजयाणं in stead of भरहाइ सत्तवासा in Ed1, Ed2 वासा ७ Tueb वां(?)सा Bhog1 चासा Bhog6 Bhog2, 5 & 7 have दारं ३ here, द्वा ३ Bhog12, द्वार Bhog15, द्वारं ३ Bhog16

[5] There is some confusion here The regular Pkt form is वेअड्ढ (Skt वैताढ्य) वे is shortened to वि metri causa But only Ed2, 3 & 16 with certainty and Bhog10, 12, 13, 14 & 15 possibly have वियड्ढ The

सोलस[5] वक्खा[6]रगिरी[7], दो चित्त[8]विचित्त[9] दो[10] जमगा[11] ॥ ११ ॥[12]
दोसय[13] कणय[14]गिरीणं[15], चउ[16] गयदंता[17] य[18] तह[1] सुमेरू[2] य[3] ।

---

difference between ड्ढ and ट्ठ is not always clear वियट्ठ Ed1, LD2 (with अ for य), Brd3, Tueb, Bhog1, 2(with वि omitted), 4, 5 (with वे for वि), 7, 8, 9, 11 & 17 वियट्ट LD1 वियठ Brd2

[1] चओ LD1 चउ ४ Bhog2 & 12 चउ २ Bhog13 & 17, here meaning चउ used twice in succession

[2] र omitted in LD2, Bhog1, 5, 8 & 12 चओर LD1 चउ omitted in Bhog6 with the three following syllables unreadable

[3] तिस Ed2 & 3 तिस Bhog2, 7, 10, 14 & 15 तास Bhog8

[4] वट्टयरे LD2 वेयड्ढा(?) ३४ Bhog2 वटियरे Bhog6 वटि(?)यरे Bhog10 & 12 वट्टियरे ३४ Bhog8 वढीयरे Bhog17

[5] सोलस्स Bhog6 सोलस १६ Bhog8 स omitted in Bhog12

[6] खा with र omitted in LD1 र omitted in Brd3 खार Brd2, Bhog2, 8, 10 & 17

[7] Ed1, Brd1, Tueb, Bhog5 (with १६ added), 9, 11, 12 15 & 16 have the metrically correct गिरी गिरि Ed2 & 3, LD1, Brd3, Bhog2 (with १६ added), 4, 6, 7, 8, 10, 13, 14 & 17 गिरीओ LD2 गीरि Brd2, गीरी Bhog1

[8] चित Brd2, Bhog15

[9] विचित Brd2, Bhog15 विचित्त २ Bhog5, 8 & 12 विचीत्त २ Bhog2 विवि(?)त्त Bhog11

[10] दो omitted in Bhog6

[11] जमग्गा LD1, Brd2 & 3 Bhog9 जगमा LD2 जमगा २ Bhog2, 5 & 8

[12] This is verse 12 in Bhog8 In Bhog2 & 5 verse 11 begins with दारं २ Bhog7 simply has दारं, Bhog12 द्वा २, Bhog15 द्वार

[13] दे(?)सय Bhog11 दोशय Bhog6

[14] य is missing in Bhog5 कणग Bhog6 & 12

[15] गिरिण Brd2, Bhog10, 14, 15 & 17 गिरिणा २०० Bhog2 गिरीणं २०० Bhog5, 8 & 13

[16] चऊ LD1 चौ Bhog17

[17] गजदता Bhog2 & 4

[18] य is missing in Ed3 य ४ Bhog2 & 8

छव्वासहरा[4] पिंडे[5], एगुण[6]सत्तरि[7] सया[8] दुन्नि[9] ॥ १२ ॥[10]

bharahāi sapta vāsā, viẏaḍḍha caü caüra-tīsa vaṭṭ'-iẏare;
solasa vakkhāra-girī, do citta-vicitta do jamagā. 11.
do saya kaṇaẏa-girīṇaṃ, caü gaẏa-daṃtā ya taha sumerū ẏa;
chav-vāsa-harā piṃḍe, eg'-uṇa-sattari saẏā dunni. 12.

(भरतादीनि सप्त वर्षाणि वैताढ्याश्चत्वारश्चतुस्त्रिंशद् वृत्तेतराः। षोडश वक्षस्कारगिरयो द्वौ चित्रविचित्रौ द्वौ यमकौ ॥ ११ ॥ द्वे शते काञ्चनगिरीणां चत्वारो गजदन्ताश्च तथा सुमेरुश्च। षड्वर्षधराः पिण्ड एकोनसप्तति(त्यधिके) शते द्वे ॥ १२ ॥ *bharatādīnı sapta varsānı vaıtādhyāś catvāraś catus-trımśad vrttetarāh, sodaśa vaksaskāra-gırayo dvau cıtra-vıcıtrau dvau Yamakau 11 dve śate kāñcana-gırīnām catvāro gaja-dantāś ca tathā sumeruś ca, sad-varsa-dharāh, pında ekona-saptatı(tyadhıke) śate dve 12*)

11-12 The seven world contınents are Bharata, etc [They contaın] four round Vaıtādhya [mountaıns], thırty-four

---

[1] तहय Bhog5
[2] सुमेरु Ed2 & 3, LD1, Brd3, Bhog1, 4(?), 6, 8, 9, 13, 14 & 15 सूमेरु Bhog10 सूमेरू Bhog17 तहयमेरु Bhog12
[3] अ Ed2, LD1 & 2, Bhog13 य १ Bhog2 वं Bhog17
[4] छवासहरा Ed1, 2 & 3, Bhog6, 9, 10, 12 & 14 छवासहरा ६ Bhog2 छव्व(?)सिहरी Bhog5 छव्वासहरी Bhog15 छव्वासाहरा Bhog17
[5] पिंडे LD1, Brd3, Bhog15 पीडे Bhog2 पिण्डें Bhog10
[6] एगूंण LD1 एगुंण Bhog13 & 16 एगूण LD2 एगुणे Brd1 इगुण Bhog14
[7] सत्तरी Ed1, Bhog1 सत्तर Tueb, Bhog4, 9 & 10 सिंतरी Bhog2 हत्तर Bhog5 & 6 हत्तरि Bhog12
[8] संया Bhog2
[9] दुन्नि· Ed1 दुन्नी Ed2 दुनि Brd2 दुन्नि २६९ Tueb, Bhog5 & 8 दुनी २६९ Bhog2 दुण्णि Bhog12 दूनि Bhog7
[10] In Bhog8 thıs ıs verse 13

others [viz straight ones], sixteen Vaksaskāra mountains, the couple Citra and Vicitra, two Yamaka mountains, two centuries of Kāñcana mountains and four Gajadantas and so also the magnificent Meru [Finally] there are six World Mountain ranges [So] there are two hundred and sixty-nine [mountains] in all

COMMENTARY

भरहाइ^इति - वर्षाणि क्षेत्राणि मनुष्यनिवासस्थानानीत्यर्थः, तानि कियत्संख्यानि? किंनामानि च भवन्ति इत्याह, सत्त त्ति सप्तसंख्यानि नामतस्तु भरतादीनि, आदिशब्दाद्धैमवतहरिवर्षमहाविदेहरम्यक[है]रण्यकवतानां ग्रहः, तथा वर्षशब्दो नपुंसकलिङ्गः पुंस्त्वे प्रयुक्तो ऽपि प्राकृतत्वात् न दोषाय, 'लिङ्गं व्यभिचार्यपि' इति वचनात्, अमूनि च सर्वक्षेत्राणि स्वाधिष्ठातृदैवतसमाननामानि। तथाहि - भरताधिपतिर्यो यो देव उत्पद्यते तं तं तत्सामानिकाद्या देवा 'भरत' इत्याह्वयन्ति, ततस्तन्नाम्ना तदधिष्ठितं क्षेत्रमपि भरतमिति कथ्यते। तथाचागमः -

"से केणट्ठेणं भंते भरहे वासे इति? गोयमा, भरहे देवे महड्ढीए, महज्जुए जाव पलिओवमट्ठिइए परिवसइ, से एएणट्ठेणं गोयमा, एवं वुच्चइ भरहे वासे।"[1]

इति एवं हैमवतादिष्वपि भावनीयमिति संक्षेपार्थः। विस्तरार्थस्त्वयं - सर्वद्वीपसमुद्राणां मध्ये परिपूर्णचन्द्रमण्डलसंस्थानः सर्वतो लक्षयोजनमानो जम्बूद्वीपो ऽस्ति, स चैकयावज्रमय्याष्टयोजनोच्छ्रयया मूलमध्योपरितनविभागेषु क्रमेण द्वादशाष्टचतुर्योजन-विस्तारया वेदिकया सर्वतो वेष्टितो ऽस्ति। यदागमः -

---

[1] Quotation untraced Chāyā स केनार्थेन भदन्त, भरतो वर्ष इति? गौतम, भरतो देवो महर्द्धिको महाद्युतो यावत पल्योपमस्थितिकः परिवसति, स एतेनार्थेन गौतम, एवमुच्यते भरतः वर्षः॥

"से णं जंबूद्दीवे एगा जगईए, सव्वओ समंता सपरिक्खित्ते सा णं जगई अट्ठजोअणां उड्ढं उच्चत्तेणं, मूले बारसजोयणाइं विक्खंभेणं, मज्झे अट्ठजोअणाइं विक्खंभेणं, उवरिं चत्तारि जोअणाइं विक्खंभेणं, मूले वित्थन्ना, मज्झे संखित्ता, उवरिं तणुआ, गोपुच्छसंठाणसंठिया, सव्ववइरामया अच्छा सण्हा, जाव वडिरूवा"[1]

इति। तस्याश्चोपरिष्टादर्द्धयोजनोच्चः पञ्चधनुःशतविस्तीर्णो गवाक्षकटकः, तथा तस्या एव बहुदेशमध्यभागे गवाक्षकटकप्रमाणोच्छ्रायदैर्घ्या परिक्षेपेण जगतीसमाना, नानारत्ननिर्माणा विविधपद्ममंडिता, पद्मवरवेदिकास्ति। यदुक्तं राजप्रश्नीयोपाङ्गे -

"से केणट्ठेणं भंते! एवं वुच्चइ, पउमवरवेइया? गोयमा पउमवरवेइया णां तत्थ तत्थ देसे तहिं तहिं वेइयासु, वेइयाबाहासु य, वेइयाफलएसु य, वेइयापुडंतरेसु य, खंभेसु, खंभबाहासु, खंभफलएसु, खंभपुडंतरेसु, सूईसु, सूईमुहेसु, सूईफलएसु, सूईपुडंतरेसु, पक्खेसु, पक्खबाहासु, पक्खफलएसु, पक्खपुडंतरेसु, बहुयाइं, पउमाइं, कुमुयाइं, नलिणाइं, सुभगाइं, सोगंधियाइं, पुंडरीयाइं, सयवत्ताइं, सहस्सवत्ताइं, सव्वरयणामयाइं, अच्छाइं, पडिरूवाइं, महयावासिकयछत्तसमाणाइं, पण्णत्ताइं, समणाउसो, से एणं अट्ठेणं गोयमा, एवं वुच्चइ पउमवरवेइया"[2]

---

[1] This is part of *sū* 124 of the *Jīvājīvābhigama* as published by Shāha Naginbhai Ghelābhāi Javeri Sresthi Devacandra Lālbhāī Jainapustakoddhāre Granthānkah 50, Bombay 1919 (... जंबुद्दीवे) ... से णं **एकाए जगतीए सव्वतो समंता संपरिक्खित्ते॥ सा णं जगती अट्ठ जोयणाइं उड्ढं उच्चत्तेणं मूले बारस जोयणाइं विक्खंभेणं मज्झे अट्ठ जोयणाइं विक्खंभेणं उप्पिं चत्तारि जोयणाइं विक्खंभेणं मूले विच्छिण्णा मज्झे संखित्ता उप्पिं तणुया गोपुच्चसंठाणसंठिता सव्ववइरामई अच्छा सण्ह ... (जाव) ... पडिरूवे** छाया (जम्बूद्वीप) सा खलु एकया जगत्या सर्वत· समन्तात सपरिक्षिप्त ॥ सा खलु जगतय अष्टयोजनान्य ऊर्ध्वम उच्चत्वेन, मूले द्वादशयोजनानि विष्खम्भेण, मध्ये ऽष्टयोजनानि विष्खम्भेण, उपरि चत्त्वारि योजनानि विष्खमभेण, मूले विस्तीर्णा, मध्ये संक्षिप्ता, उपरि तनुका, गोपुच्छसस्थानसंस्थिता, सटर्ववज्रमय्य अच्छा श्लक्ष्णा, (यावत्) प्रतिरूप ॥

[2] This a part of *sū* 9 of the *Rājapraśnīyasūtra*, Jaina-Śāstroddhāra-Samiti ed (with Skt commentary by Pūjyaśrī Ghāsīlālji and with Hindī and Gujaratī translation), Rajkot, 1965, Vol I, p 459 **से केणट्ठेणं भंते!**

इति। तस्याः पार्श्वद्वये ऽपि द्वौ वनखण्डौ वेदिकामानदैर्घ्यौ विद्येते, नवरं विस्तारेणाभ्यन्तरः सार्द्धधनुःशतद्वयोनयोजनयुग्मप्रमाणो, बाह्यस्तु वनखण्डो ऽर्द्धाष्टमधनुःशतहीन-योजनयुग्ममानो, यतस्तत्रान्यान्यप्यभ्यन्तरात् वनखण्डादधिकानि पञ्चधनुःशतानि जालकटकेनावरुद्धानि, परं श्रीमलयगिरिपादैर्नैतद्विवक्षितं, द्वयोरपि वनखण्डयोरेकमेव मानमुक्तं, तत्त्वं तु बहुश्रुता विदन्ति। तस्यां च वेदिकायां मेरुपर्वतात्पञ्चचत्वारिंशद्योजन-सहस्राणि दक्षिणस्यां दिश्यतिगत्य अष्टयोजनोच्छ्रायं चतुर्योजनविस्तारं प्रत्येकमेकैकक्रोशविस्तारया द्वारशाखया कलितं, ततः सामस्त्येन सार्द्धयोजनचतुष्टयविस्तारं वैडूर्यमयाभ्यां कपाटाभ्यां वज्रमय्या परिधिया निर्जटितं, अनेकसामानिकसुरादिदेवाग्रमहिष्यादिदेवीकृतसेवार्द्ध-पल्योपमायुर्वैजयन्तदेवाधिष्ठितं वे(वै) जयन्ताभिधानं द्वारमस्ति। तथा अमुतो द्वारात् उदीच्यां हिमवन्तं पूर्वापरयोस्तु लवणोदन्वन्तं यावद्गतं भरतनामकं विजयक्षेत्रं तच्च बहुमध्यदेशभागे पूर्वापरयोर्लवणसमुद्रप्राप्तेन पञ्चाशद्योजनविस्तीर्णेन तदर्द्धोच्चेन रजतमयेन वैताढ्यपर्वतेन द्विधा कृतं, तेन दक्षिणभरतार्द्धमुत्तरभरतार्द्धं चेति भण्यते। हिमवत्पर्वतोर्ध्वतलस्थितात् पद्मह्रदान्निर्गताभ्यां प्रथमं पूर्वापरयोर्गत्वा स्वस्वनामधेयकूटादावृत्य दक्षिणां दिशमनुश्रित्य विजयाढ्यपर्वतं विभिद्य दक्षिणलवणोदधिं प्रविष्टाभ्यां

एवं वुच्चइ - पउमवरवेइया - पउमवरवेइया? गोयमा! पउमवरवेइयाएणं तत्थ तत्थ तहिं तहि देसे वेइयासु य वेइयाफलएसु य वेइयापुडंतरेसु य खंभेसु य खंभबाहासु य खंभसीसेसु खंभपुडंतरेसु सूईसु सूईमुखेसु सूईफलएसु सूईपुडंतरेसु पक्खेसु पक्खबाहासु पक्खपेरंमतेसु पक्खपुडंतरेसु, बहुयाइं उप्पलाइं पउमाइं कुसुमाइं णलिणाइं सुभगाइं सोगंधियाइं पुंडरीयाइं महापुंडरीयाइं सयवत्ताइं सहस्सवत्ताइं सव्वरयणामयाइं अच्छाइं जाव पडिरूवाइं महयावासिकछत्तसमाणाइं पण्णत्ताइं समणाउसो! से एएणं अट्ठेणं गोयमा! पउमवरवेइया - पउमवरवेइया छाया अथ केनार्थेन भदन्त! एवमुच्यते - पद्मवरवेदिका पद्मवरवेदिका? गौतम! पद्मवरवेदिकाया खलु तत्र तत्र तस्मिन् तस्मिन् देशे वेदिकासु वेदिकाबाहुषु च वेदिकाफलकेषु च वेदिकापुटान्तरेषु च स्तम्भेषु च स्तम्भबाहुषु च स्तम्भशिरस्सु स्तम्भपुटान्तरेषु सूचिषु सूचीमुखेषु सूचीपुटान्तरेषु पक्षेषु पक्षबाहुषु पक्षपर्यन्तेषु पक्षपुटान्तरेषु बहुकानि उत्पलानि पद्मानि कुमुदानि नलिनानि सुभगानि सौगन्धिकानि पुण्डरीकाणि महापुण्डरीकाणि शतपत्राणि सहस्रपत्राणि सर्वरत्नमयानि अच्छानि यावत् प्रतिरूपाणि महावार्षिकछत्रसमानानि प्रज्ञप्तानि श्रमणायुष्मन् तत् एतेनार्थेन गौतम! पद्मवरवेदिका - पद्मवरवेदिका ॥

गङ्गासिन्धुभ्यां तच्च कृतषट्खण्डं, तत्र च प्राणिप्राणव्यपरोपणप्रवणान्तःकरण-म्लेच्छव्याप्तत्वादनार्याणि पञ्च खण्डानि। एकं च वैताढ्यात् दक्षिणस्यां दिशि एकादशकलाधिकं चतुर्दशोत्तरं योजनशतमतिगत्यनव-योजनविस्तीर्णया द्वासशयोजनदीर्घया अयोध्यया नगर्या विराजितं, गङ्गासिन्धुवैताढ्यदक्षिण-समुद्राणां मध्यस्थितं जिनचक्रयर्द्धचक्रिप्रमुखोत्तमपुरुषाध्यासितमार्यं। उक्तं च - "आर्यावर्त्तो जन्मभूमिर्जिनचक्रयर्द्धचक्रिणाम्"[1] इति। तथा वैताढ्ये ऽपाच्यां तमिस्रा गुहास्ति, सा च द्वादशयोजनायामा पञ्चाशद्योजनदैर्घ्या कृतकृतमालदेवनिवासा वेजयन्तसमानद्वारा, तस्याश्च बहुमध्यदेशे द्वियोजनान्तराले प्रत्येकं त्रियोजनविस्तारे उन्मग्नजलानिमग्नजले नद्यौ स्तः। एवं प्राच्यां नृत्तमालदेवाधिष्ठिता खण्डप्रपातगुहा। तस्य च गिरेर्मूलाद्दशयोजनान्युत्प्लुत्य वेदिकावनखण्डमंडितं पर्वतप्रमाणदैर्घं प्रत्येकं दशदशयोजनविस्तारं विद्याधरनगरश्रेणिद्वयं विद्यते, किञ्च दक्षिणदिग्वर्त्तिन्यां श्रेणौ सुप्रजोभिर्जनपदैर्विराजितानिरथनूपुरचक्रवालपुरःसराणि पञ्चाशद्विद्याधर-नगराणि उत्तरश्रेणौ तु गगनवल्लभादीनि षष्टिः पुराणि, तेषु धरणेंद्रप्रकाशिताष्टाचत्वारिंशत्सहस्रमहाविद्याप्रसादोपनतप्रकम्रसमस्तमनोरथार्थि तथिपदार्थसमासादितपरमानंदसंदोहा, गगनगमनसामर्थ्यसमन्विता विद्याधराः सुखमासते। पुनर्दशयोजनान्युपरिष्टादारुह्य विद्याधरश्रेणिसमा ऽविषमोन्नतभूमिरिंद्राभियोगिकदेवकृतनिवासा श्रेणिद्वयी समस्ति। ततो ऽपि पञ्चसु योजनेषूपरि दशयोजनानि विस्तीर्णं, वेदिकावनखण्डमनोहरतं, अनल्पकल्पवासिदेवक्रीडायोग्यं स्थानमास्ते। तत्र सपादशतयोजनोच्छ्रयाणि तावन्मूलविस्ताराणि उपरिष्टात् सार्द्धद्वादशक्रोशायामानि नव कूटानि। तथाहि, सिद्धायतन १ दक्षिणार्द्धभरत २ खण्डप्रपात ३ मणिभद्र ४ विजयाढ्य ५ पूर्णभद्र ६ तमिस्रागुह ७ उत्तरार्द्धभरत ८ वैश्रमण ९ नामानि, तेषु माणिभद्रविजाढ्य-पूर्णभद्रकूटानि हिरण्यमयानि, अपराणि षट्रत्नमयानि, प्रथमे पूर्वदिग्वर्त्तिनि (कूटे) क्रोशदैर्घ्यं क्रोशार्द्धविस्तीर्णं चत्वारिंशदर्गलचतुर्दशधनुःशतोच्छ्रायं सिद्धायतनं, तस्मिन् पञ्चधनुः शतोच्चानि तदर्द्धविस्ताराणि त्रीणि द्वाराणि तिसृषु दिक्षु। तद्यथा - प्राच्यां प्रथमं द्वारं, द्वितीयं दक्षिणस्यां, तृतीयमुदीच्यां, प्रतीच्यां तु न किंचिदिति। किञ्च सर्वेषु सिद्धायतनेषु प्रासादेषु च जम्बूद्वीपमध्ये ऽयमेव द्वारदिग्विभागः, तस्य हि बहुमध्यदेशे

---

[1] Quotation untraced

क्रोशचतुर्थांशायामविष्कम्भा तदर्द्धपृथुला मणिपीठिका, तस्या उपरि पञ्चधनुःशतायामविस्तारस्तदधिकोच्छ्रायो देवच्छन्दकस्तत्राष्टोत्तरं शतं प्रतिमाः, ता हि जघन्यतः सप्तहस्तप्रमाणा उत्कर्षतः पञ्चधनुःशतोच्चा ऋषभवर्द्धमानचंद्राननवारिषेणाख्याः सन्ति। पूर्णकलशनागदन्त-शालभंजिकाजालकटकादिरचनाविशेषाः सर्वचैत्येषु ज्ञेयाः। ततः परं भरतार्द्धकूटं, तत्र भरतदेवस्य सिद्धायतनप्रमाणः प्रासादः। खण्डप्रपाततमिस्रागुहयोर्नृत्तमालकृतमालौ देवौ, अन्येषु पञ्चसु स्वनामानो देवाः प्रासादेषु विलसन्ति। तथा हिमवन्नितम्बे दक्षिणदिशि मूले द्वादश योजनानि उपरि चत्वारि विस्तीर्णो ऽष्टयोजनोच्छ्रय ऋषभदेवनिवासो रत्नमय ऋषभकूटनामा पर्वतो ऽस्ति। स च 'भूमिकूट' इति इह प्रकरणे प्रसिद्धः। चक्री षट्खण्डां वसुन्धरां विजित्यास्मिन् स्वनाम लिखति। भरतमुत्तरेण पूर्वापरयोर्लवणसमुद्रं प्राप्तो भरताद् द्विगुणविस्तारो योजनशतोच्छ्रयो हेममयो हिमवान् वर्षधरस्तदुपरि बहुमध्यदेशभागो योजनसहस्रदैर्घ्यस्तदर्द्धविस्तरो दशयोजनावगाढो जलपूर्णः पद्महृदस्तस्य रजतमयं कूलं, वज्रमयपाषाणाश्चतुर्दिशिमणिसोपानाः, तन्मध्ये योजनायामविस्तारम-र्द्धयोजनपिण्डं दशयोजनोच्चनालं गव्यूतद्वय जलादुपरि स्थित पद्मं विद्यते, वज्रमयं तस्य मूलमरिष्टमय. कन्दः। वैडूर्यमयो नालः बाह्यपत्राणि च, मध्यानि तु जम्बूनदमयानि, कनकमयीकर्णिका, स्वर्णमयानि केसराणि, विविधमणिमयं पुष्करं, सा च कर्णिका द्विगव्यूतप्रमाणा पृथुला त्वेकं गव्यूतं, तस्या उपरि पीठिकादेवच्छन्दकादियुतं श्रीदेवीभवनतं, एतादृशेनार्द्धप्रमाणेन कमलानामष्टशतेन वृतं, तत्र श्रीदेव्या आभरणानि, तद्वाह्येषु वायव्यौदीच्यैशानेषु दिग्भागेषु चत्वारि कमलसहस्राणि ४०००, तेषु तावन्तम् एव सामानिका देवा देव्यो वा। पूर्वस्यां दिशि चतुर्षु पद्मेषु चतसृणा महामंत्रिसदृशीना स्थानानि, आग्नेय्यामष्टसु पद्मसहस्रेषु श्रीदेव्या अभ्यन्तरायां पर्षदि देवानामष्टौ सहस्राः ८०००, दक्षिणस्यां दिशि दशसु पद्मसहस्रेषु १००००, तावन्त एव मध्यपर्षदि मित्रस्थानीया देवाः। नैर्ऋत्यां द्वादशसु पद्मसहस्रेषु १२०००, तावन्त एव किङ्करस्थानीयाः सुराः बाह्यपर्षदि। पश्चिमायां सप्तसु पद्मेषु सप्तानामनीकाधिपतीनामाश्रयाः, तथा चतसृषु दिक्षु पूर्वादिकासु षोडशसु पद्मसहस्रेषु १६००० आत्मरक्षकदेवानां स्थानानि, एतद्वेष्टनकत्रयं मध्यं। अपरे ऽपि बाह्याः त्रयः परिरयाः, तेष्वभ्यन्तरे परिक्षेपे द्वात्रिंशल्लक्षाणि ३२०००००, मध्यमे चत्वारिंशच्छतसहस्राणि ४००००००, अष्टाचत्वारिंशल्लक्षाणि

४८००००० पद्मानां बाह्ये भवन्ति। एवं सर्वाग्रेण एका कोटी विंशतिलक्षाणि पञ्चाशत्सहस्राणि विंशत्यधिकमेकं शतं च १२०५०१२० पद्महृदे पद्मानि। महापद्मादिष्वप्येषैवकमलानां संख्येति, तस्मात्तु हृदात् पूर्वद्वारतोरणात् पञ्चयोजनशतानि पूर्वस्यां पूर्वतोपरि गत्वा गङ्गावर्त्तकूटादावर्त्त्य दक्षिणाभिमुखं पञ्चयोजनशतानि, त्रयोविंशानि साधिकाध्युष्टकलायुतान्यतिक्रम्य द्विगव्यूतदीर्घान्मकरमुखान्निःसृत्य गङ्गाप्रपातकुण्डे निपतति। तच्च कुण्डं षष्टियोजनायामविस्तारमुपरिष्टात्, अधस्तु दशयोजनन्यूनं दशयोजनावगाढं वज्रमयतलं त्रिद्वारतोरणसोपानादियुतं, तन्मध्ये गङ्गाद्वीपो ऽष्टयोजनायामविष्कम्भो गव्यूतद्वयं जलादुपरि गतः, तन्मध्ये भवनं, तत्र पीठिकायां गङ्गादेव्याः शय्येति। ततो दक्षिणतोरणाद्विनिर्गत्य विजयाढ्यपर्वतं जगतीं च विभिद्य चतुर्दशनदीसहस्रपरीता जलधिं प्रविशेष गङ्गा। तस्या हृदाद् विनिर्गमे मकरमुखे कुण्डात्प्रवाहे च सक्रोशानि षट् योजनानि विस्तारः क्रोशार्द्धमुद्वेधः मुखप्रस्तारः प्रवाहाद् दशगुणः। उक्तं च -

"जो जीसे वित्थारो, सलिलाए होइ आढवंतीए।
सो दसहिं पडिपुन्नो मुहवित्थारो मुणेयव्वो ॥ १ ॥"[1]

उद्वेधस्तु सर्वत्र प्रस्तारात्पञ्चाशत्तमो भागः। यत उक्तं -

"जो जत्थ उ वित्थारो, सलिलाए होइ जंबुदीवंमि।
पन्नासइमं भागं, तस्सुव्वेहं वियाणाहि ॥ १ ॥"[2]

तथाऽस्या अपि द्वे तटे वेदिकावनखण्डवती, न चैतद्यादृच्छिकतं, यदागमः -

"गङ्गा णं महानई उभओ [...] पासेहिं दोहि य पउमवरवेइयाहिं दोहि य वणसंडेहिं संपरिखित्ता।"[3]

---

[1] बृहत्क्षेत्रसमास, verse 227 (*BKSJ*, p 225)
यो यस्या विस्तार सलिलाया भवत्यारभमाणायाः।
स दशभिः प्रत्युत्पन्नो मुखविस्तारो ज्ञातव्य ॥ २२७ ॥

[2] बृहत्क्षेत्रसमास, verse 228 (*BKSJ*, p 225)
ये यत्र तु विस्तारः सलिलाया भवति जम्बूद्वीपे।
पञ्चाशत्तमं भागं तस्योद्वेध विजानीहि ॥ २२८ ॥

[3] गङ्गा ननु महानदी उभयः [ ] पार्श्वैर् द्वे च पद्मवरवेदिकाभिर् द्वे च वनसंदैहैः संपरिक्षिप्ता ॥ Quotation untraced

एवं पश्चिमतोरणद्वारान्निर्गता सिन्धवावर्त्तकूटादावर्त्य विवृतमुखाकारात् नालान्निपत्य सिन्धुदेवीनिवासं कुण्डं मध्येकृत्य तथैव जलधिं गता सिन्धुनदी। तथोत्तरतोरणाद्विनिर्गता गङ्गाद्विगुणमानपरिवारा स्वनामकुण्डे निपत्य शब्दापातिनं गव्यूतद्वयेनास्पृशन्ती हैमवतं क्षेत्रं मध्येकृत्यापरोदधिं गता रोहितांशा। हिमवति सर्वरत्नमयान्येकादश कूटानि। तद्यथा - सिद्धायतन १ क्षुल्लहिमवत् २ भरत ३ इला ४ गङ्गा ५ श्री ६ रोहितांशा ७ सिन्धु ८ सुरा(देवी) ९ हैमवत १० वैश्रमणाख्यानि ११ तेषां मूलविस्तार उच्चत्वं च पञ्चयोजनशतानि, शिखरविस्तारस्तु तदर्धमानः, प्रथमकूटे (क्षुल्लनाम्नि) सिद्धायतनं पञ्चाशद्योजनानि दीर्घं तदर्धं पृथुलं षट्त्रिंशद्योजनोच्छ्रयं, तस्मिन् त्रीणि द्वाराणि, तेषामायामो ऽष्टौ योजनानि, तदर्धं विष्कम्भः, अष्टयोजनायामविष्कम्भा तस्य मध्ये मणिपीठिका, सा च चत्वारि योजनानि पृथुला, तदुपरि देवच्छन्दकस्तत्प्रमाणः आयामोच्छ्रायाभ्यां किंचिदधिकः। तत्र प्रतिमा यथा वैताढ्याद्यकूटे प्रोक्ताः। शेषेसु दशसु कूटेषु सार्धद्वाषष्टियोजनोच्छ्रायाः सक्रोशैकत्रिंशद्योजनविस्ताराः सिंहासनादियुक्ताः प्रासादाः सन्ति। हिमवन्महाहिमवतोरन्तराले भरताच्चतुर्गुणविस्तारं पूर्वापरयोर्लवणसमुद्रं प्राप्तं स्वनामदेवाधिष्ठायकं दशविधकल्पपादप-प्रभावोपढौकिताभिलषिताहारनेपथ्यभरणशयनीयावासादिलालितवपुर्भिर्युगलि कैर्विराजितं हैमवतनामकं क्षेत्रमस्ति। तत्र ते युगलधर्मिणश्चतुःषष्टिपृष्ठकरण्डभ्राजितमेकगव्यूतोच्चं चतुर्थभक्तान्ते कृतमनो ऽभिलषिताहारं रोगजराप[1]मृत्युदुःखदौर्मनस्यादिरहितमेकपल्योपमायुर्देहं दधानाः, पर्यंते एकोनाशीतिदिनान्यपत्यानि पालयित्वा स्वस्य समस्थितिष्वल्पस्थितिषु वा देवेषूत्पद्यन्ते। अत्र च केचिदेतेषां चणकबदरामलकप्रमितमाहारमेकद्वित्रिगव्यूतप्रमाणशरीराणां क्रमेण, अपरे चाष्टादशव्यञ्जनाकुलां रसवतीं भोजनतयाभिदधति। तन्न सकर्णानां कर्णमवतंसयति, यतः शर्कराजित्वररसा पृथ्वी कल्पवृक्षाणां फलानि च तेषामाहारतयोपयुज्यन्ते। आह चागमः -

"पुढवी पुप्फफलाहारा, ते णं मणुआ पन्नत्ता।"[2]

---

[1] जराप from Skt जरात्व (= वृद्धत्व) in the sense of the Hindi बुढापा

[2] This is part of *sū* 111 of the जम्बूद्वीपप्रज्ञप्ति ed Shāha Naginbhai Ghelābhāi Javeri, Śresthi Devacandra Lālbhāī Jainapustakoddhāre

तत्र च सिंहव्याघ्रसर्पबिडालादयो दुष्टतिर्यंचो ऽपि क्षेत्रस्वाभाव्यान्मिथो हिंस्यहिंसक-भाववर्जिताः प्रतनुकषायतयावतिष्ठन्ते। अतस्तद्भाव-भावितत्वादपि देवगतिमेवाश्नुवते। दंशमशकयूकामत्कुणप्रमुखाः शरीरसंतापकारिणः क्षुद्रजन्तवस्तु मूलतो ऽपि न भवन्ति। कालस्तत्र सुषमदुषमारूप एक एव। तन्मध्ये पञ्चवर्णरत्नमयः सर्वतः सहस्त्रयोजनप्रमाणः पल्याकाराः शब्दापाती वृत्तवैताढ्यपर्वतो, ये ऽमुं रजतमयमभिदधति, तेषां जम्बूद्वीपप्रज्ञप्त्या सह विरोधः। तत्र ह्येवमुक्तं -

"कहि णं भंते हेमवए वासे सद्दावईनामं वट्टवेयड्ढपव्वए पन्नत्ते? गोयमा रोहियाए महानईए, पच्चच्छिमेणं रोहिअंसाए महानए पुरच्छिमेणं हेमवयवासस्स बहुमज्झदेसभागे इत्थणं सद्दावई नामं वट्टवेयड्ढे पव्वए पन्नत्ते, एगं जोयणसहस्सं उड्ढं उच्चत्तेणं, अड्ढाइयाइं जोयणसयाइं उव्वेहेणं, सव्वत्थसमे, पल्लगसंठाणसंथिए, एगं जोयणसहस्सं आयामविक्खंभेणं तिन्नि जोयणसहस्साइं एगं च बावट्ठंजोयणसयं (३१६२) किंचि विसेआहियं परिक्खेवेणं सव्वरयणामए अच्छे इत्यादि।"[1]

Granthānkah 50, Bombay, 1919, p 150 The full sentence reads ते णं भंते मणुया! किमाहारमाहारेंति? गोयमा! पुढविफुप्फफलाहारा ते मणुयगणा पण्णत्ता समणाउसो! छाया ते खलु भदन्त मनुजाः! किमाहारमाहारन्ति गौतम! पृथिवीपुष्पफलाहारास्ते मनुजगणा प्रज्ञप्ता श्रमणायुष्मन्' The quotation also occurs verbatim in the *JDP*, *sū* 22, ed Javeri, p 117 पुढवीफुप्फफलाहारा ते मणुआ पण्णत्ता , with reference to the *Jīvābhigamasūtram* (ed Shāha Naginbhai Ghelābhāi Javeri, 1919) by Śanticandra, commentator on the *JDP*

[1] जम्बूद्वीपप्रज्ञप्ति, सू ७७, ed Shāha Naginbhai Ghelābhāi Javeri, Śresthi Devacandra Lālbhāī Jainapustakoddhāre Granthānkah 50, Bombay, 1919 कहि णं भन्ते! हेमवए वासे सद्दावई णामं वट्टवेअड्ढपव्वए पण्णत्ते? गोयमा! रोहिआए महाणईए पच्चच्छिमेणं रोहिअंसाए महाणईए पुरत्थिमेणं हेमवयवासस्स बहुमज्झदेसभाए एत्थ णं सद्दावए णामं वट्टवेअड्ढपव्वए पण्णत्ते एगं जोअणसहस्सं उद्धं उच्चत्तेणं अड्ढाइज्जाइं जोअणसयाइं उव्वेहेणं सव्वत्थसमे पल्लगसंठाणसंथिए एगं जोअणसहस्सं आयामविक्खंभेणं तिण्णि जोअणसहस्साइं एगं च बावत्थं जोअणसयं किंचिविसेसाहिअं परिक्खेवेणं पण्णत्ते, सव्वरयणामए अच्छे। ... छाया कुत्र ननु भदन्त! हैमवतवर्षे शब्दापाती नाम्ना वृत्तवैताढ्यपर्वत प्रज्ञप्त? गौतम! रोहितामहानद्याः पश्चिमेन

उमास्वातिवाचको ऽप्येवमेवाह तथा च तद्वाक्यं -

"वृत्तो विविधरत्नमयः सर्वतः साहस्रः शब्दापातिगिरिरिति।"[1]

अत एतद्वर्णके यत्क्षेत्रसमासे 'रययमया' इत्युक्तं, तन्न संवादीति[2], किन्तु 'रयणमया' इति संवादी पाठ इति तथा तदुपरि स्वाभिधानदेवभवनं हिमवत्कूटप्रासादसदृशं। तदुत्तरो हैमवतक्षेत्राद् द्विगुणविस्तारो ऽर्जुनमयो योजनशतद्वयोच्चो महाहिमवान्, तत्र बहुमध्ये पद्महृदाद् द्विगुणायामविष्कम्भो महापद्महृदः कृतह्रीदेवीनिवासः। पद्मानि पद्महृदसंख्या(संनिभा)न्यत्र, एतद्दक्षिणतोरणान्निःसृत्य पञ्चकलाधिकानि पञ्चोत्तराणि षोडशयोजनशतानि पर्वतमुल्लंघ्य रोहितादेव्यधिष्ठिते गङ्गाप्रतापकुण्डाद् द्विगुणायामविष्कम्भे दशयोजनोद्वेधे रोहिताप्रतापकुण्डे निपत्य शब्दापातिनं चतुर्थांशेन परिधाय गव्यूतद्वयेनास्पृशन्त्यष्टाविंशत्या नदीसहस्रैः समं रोहितांशासमविस्तारा रोहिता पूर्वोदधिं प्राविशत्। तथोत्तरद्वारान्निर्गत्य प्रवाहे पंचविंशतियोजनायामा मुखे तु दशगुणविस्तारा स्वनाम्नि कुण्डे निपत्य एकयोजनास्पृष्टगन्धापातिका प्रवाहे मुखे च क्रमेणार्द्धपञ्चयोजनोद्वेधा षट्पञ्चाशन्नदीसहस्रसहिता हरिकान्ता पश्चिमोदधिं गता। तस्मिन् पर्वते ऽष्टौ कूटानि, तद्यथा सिद्धायतन १ महाहिमवत् २ हैमवत ३ रोहिता ४ ह्री ५ हरिकान्ता ६ हरित् ७ वैडूर्य ८ नामानि, हिमवत्कूटतुल्यानि स्वनामधेयदैवतानि। तस्मादुत्तरस्यां दिशि हरिवर्षं क्षेत्रं तत्र युगलिनः प्रागुक्तयुगलिकेभ्यो द्विगुणविशेषणाः केवलं कृतचतुःषष्टिदिनापत्यपालनाः षष्ठप्रान्ते विहिताहाराश्च, तस्य बहुमध्यदेशभागे ऽरुणदेववसतिः शब्दापातिविशिष्टो गन्धापाती। कालस्तु तत्र सुषमारूपः सदैव। तदुत्तरो हरिवर्षक्षेत्राद् द्विगुणविस्तारश्चतुःशत-

---

रोहिताशा महानद्या· पूर्वेण हैमवतवर्षस्य बहुमध्यदेशभागे तत्र ननु शब्दापाती नाम्ना वृत्तवैताढ्यपर्वत प्रज्ञप्तः, एकं योजनसहस्रम् ऊर्ध्वोच्चत्वेन अर्धतृतीयानि योजनशतानि उद्वेधेन सर्वत्र समः पल्यङ्कसंस्थानसंस्थित· एकं योजनसहस्रम् आयामविष्कम्भाभ्यां त्रीणि योजनसहस्राणि एकं च द्राषष्ट्यधिकं योजनशतं किञ्चिद्विशेषेण परिक्षेपेण प्रज्ञप्तं सर्वात्मना रत्नमय· आच्छ·, Also quoted in the commentary on the बृहत्क्षेत्रसमास, verse 173 (*BKSJ*, p 178)

[1] जम्बूद्वीप्समास of उमास्वाति (*JDSU*, p 8, line 4) The sentence in full reads तन्मध्ये वृत्तो विविधरत्नमय· सर्वतः साहस्र· शब्दापाती गिरि·।

[2] For संवावदीति of Ed I

